# Shrirama Laghu Mahimna Stotram

# શ્રીરામલઘુમહિમ્નસ્તોત્રમ્

## Document Information

Text title : Rama Laghu Mahimna Stotram

File name : rAmalaghumahimnastotram.itx

Category : raama

Location : doc_raama

Proofread by : Mohan Chettoor

Latest update : January 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 9, 2023

*sanskritdocuments.org*

# શ્રીરામલઘુમહિમ્નસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીરામાય નમઃ ॥

અથ મઙ્ગલાચરણમ્ ।
સ્વર્ગીયભોગાસ્પદલક્ષવૃત્તિષુ
    સાધ્યાદ્યસાધ્યાદિવિયોગતન્તુષુ ।
આનન્દરૂપેઽપ્યનવસ્થિતંહિ મે
    માતસ્ત્વદારાધનલોલુપં મનઃ ॥

રામં સદાનન્દમયં પરેશં
    સચ્ચિન્મયં વાઙ્મયદિવ્યરૂપમ્ ।
અગ્નિં નભસ્થં યુતનાદબિન્દુ-
    બીજસ્વરૂપં સતતં નમામિ ॥

અથ રામ(લઘુ)મહિમ્નસ્તોત્રમ્ ।
રમન્તે યસ્મિન્ તે મુનિવરગણાઃ સિદ્ધનિકરા-
    યમાનન્દાકારં સકલજગદાધારનિલયમ્ ।
નમન્તિ ત્રૈવર્ગાસ્ત્રિગુણમયતત્વાદિકિરણં
    તમેવ શ્રીરામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૧॥

પ્રકાશો રાકારઃ પ્રકૃતિમયરૂપો હરનુતો-
    વિમર્શશ્ચૈવાસૌ વિકૃતિજતનુર્માક્ષરપદઃ ।
વિસર્ગાકારશ્ચિન્મયપરમસત્તાત્મકતનુઃ
    પરં દિવ્યં રામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૨॥

પુનઃ શ્રીરાકારો દહનનિલયો રક્તવદનો-
    મકારઃ શુદ્ધાભઃ શશધરતનુર્નિત્યધવલઃ ।
તયોર્યોગાદ્રામેતિ ભવતિ મહાતારકમનુ-

ર્મહારૂપં રામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૩॥

જગન્માયા દિવ્યા પરમજનનો રાક્ષરમયી
શિવો બ્રહ્માકારઃ પરમજનકો માક્ષરમયઃ ।
ઉભૌ તૌ રામેતી-હ જગતિ સદા સંવિલસતઃ
શિવાકાર રામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૪॥

મહારેફાત્તેજો ગગનમપિ ચાકારસુલિપેઃ
શતાનન્દાજ્જાતચ્ચ સલિલમકારાદ્વસુમતી ।
વિસર્ગાદ્વાયૂરા મ ઇતિ કિલ તત્વાત્મકમનુઃ
સતત્વં શ્રીરામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૫॥

પરો રાકારોવૈ ભુવનરચનાદ્યઙ્કુરમયો
મકારો બ્રહ્માણ્ડોભવનિખિલબીજાદિવિભવઃ ।
મહામન્ત્રો રામે-તિ પરતરબીજાઙ્કુરમય-
સ્તમાદિ શ્રીરામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૬॥

ભુવાં કુણ્ડલ્યાખ્યા ભુજગસદૃશી રાક્ષરમયી
મકારાક્ષેલીનં નભસિ શશિનો મણ્ડલમપિ ।
મહાયોગાદ્યા સા શુભહઠમયો રામપદવી
સુયોગેશં રામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૭॥

જ્વલચ્છ્રીરાકારો નિખિલજનસમ્પત્પ્રદલિપિ-
ર્મકારઃ શીતાક્ષો નિજસકલતત્વાદિજનકઃ ।
અભૂચ્છ્રિમદ્રામેતિ પુનરઘરામ્નાયજમનુ-
મહેશં શ્રીરામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૮॥

પરઃ સીરૂપાક્ષઃ કહરિહર શક્ત્યઙ્ગનિકરો
મહોગ્રાખ્યાતારાકૃતિરપિચતારેતિપદવી ।
તતોમૌકારાક્ષઃ ખલુ પરમહેશાવયવકઃ
શુભૌસીતારામૌ સ્મરહરનુતૌ નૌમિ સતતમ્ ॥ ૯॥

સ્વબીજં રામં ઙેયુતમથ નિયોજ્યાપિહૃદયં
ભવેન્મન્ત્રો દિવ્યઃ પરમસુખદઃ પડ્લિપિમયઃ ।
મહાવિદ્યાદાતા યમભયહરઃ સર્વધનદઃ
ષડણેશં રામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૧૦॥

ત્રપા તારાન્ત્યસ્થા તદનુ હૃદયાખ્યં શુભપદં
    તતો રામો ઙેન્ત્યશ્ચ પરમશિવેશીપ્રણવકઃ ।
મહાસમ્પદ્દાતા ભુવનવિજયાષ્ટાક્ષરમનુઃ
    શુભષ્ટાર્ણં રામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૧૧॥

મહાતારો માયા તદનુ કમલા સા રતિપતિઃ
    શુભા વાણી પશ્ચાત્ પરમનિજબીજં મનુવરમ્ ।
ષડર્ણોઽયં મન્ત્રો ભવતિ જપતામિષ્ટજનકઃ
    સુબીજાખ્યં રામં સ્મરહસ્નુતં નૌમિ સતતમ્ ॥ ૧૨॥

મનોજ્ઞં ષટ્કોણઞ્ચ વસુદલયુગ્મં શુભકરં
    ત્રિવૃત્તં તદ્બાહ્યેઽર્કદલકમલં પોડશદલમ્ ।
તતો દ્વાત્રિંશત્કં તદનુધરણીચક્રહુતકં
    તદન્તસ્થં રામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૧૩॥

સ્વવામોરૌ વામં સ્વકરકમલં દક્ષમપરં
    લસત્પ્રાજ્ઞા મુદ્રં દધતમપિ વીરાસનગતમ્ ।
ઘનશ્યામં ભ્રાજન્મણિમુકુટમાપીતવસનં
    સસીતં શ્રીરામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૧૪॥

ઇદં સ્ત્રોત્રં રામે-તિ સુમનુસમુદ્ધારણયુતં
    પુનર્ધ્યાનોદ્ધારા-તિ શુભકરયન્ત્રાખ્યસહિતમ્ ।
પ્રસાદાર્થં રામ-સ્ય નનુ ધનશંશેરરચિતં
    ક્ષમાર્થં શ્રીરામં સ્મરહરનુતં નૌમિ સતતમ્ ॥ ૧૫॥

ઇતિ શ્રીધનશંશેર જઙ્ગવર્મણાવિરચિતં વીરેન્દ્રકેસરિન્
શર્મણા સંશોધિતં શ્રીરામલઘુમહિમ્નસ્તોત્રમ્ ॥

Proofread by Mohan Chettoor

*Shrirama Laghu Mahimna Stotram*

pdf was typeset on January 9, 2023

Please send corrections to *sanskrit@cheerful.com*